योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०४१

एकचत्वारिंशः सर्गः ४१

श्रीवसिष्ठ उवाच ।

शिवः किमुच्यते देव परंब्रह्म किमुच्यते ।

आत्मा किमुच्यते नाथ परमात्मा किमुच्यते ।। १

तत्सत्किंचिन्न किंचिच्च शून्यं विज्ञानमेव च ।

इत्यादिभेदो भगवंस्त्रिलोकेश किमुच्यते ।। २

ईश्वर उवाच ।

अनाद्यन्तमनाभासं सत्किंचिदिह विद्यते ।

इन्द्रियाणामगम्यत्वाद्यन्न किंचिदिव स्थितम् ।। ३

श्रीवसिष्ठ उवाच ।

यदिन्द्रियाणां बुद्ध्यादियुक्तानामप्यदृश्यताम् ।

गतं तत्कथमीशान त्वशङ्केनोपगम्यते ।। ४

ईश्वर उवाच ।

यो मुमुक्षुरविद्यांशः केवलो नाम सात्त्विकः ।

सात्त्विकैरेव सोऽविद्याभागैः शास्त्रादिनामभिः ।। ५

अविद्यां श्रेष्ठया श्रेष्ठां क्षालयन्निह तिष्ठति ।

मलं मलेनापहरन्युक्तिज्ञो रजको यथा ।। ६

काकतालीयवत्पश्चादविद्याक्षय आगते ।

प्रपश्यत्यात्मनैवात्मा स्वभावस्यैव निश्चयः ।। ७

यथाकथंचिदङ्गारे निघृष्य क्षालयञ्छिशुः ।
करनैर्मल्यमाप्नोति कार्ष्ण्याङ्गारक्षये यथा ।। ८
यथाकथंचिच्छास्त्राद्यैर्भागैर्भागं विचारयेत् ।
सात्त्विकस्तामसो भागो द्वयोरात्मोदयस्तथा ।। ९
पश्यत्यात्मानमात्मैव विचारयति चात्मना ।
आत्मैवेहास्ति नाविद्या इत्यविद्याक्षयं विदुः ।। १०
यावत्किंचिदिदं वस्तु नाना नात्मावगम्यताम् ।
क्रमा गुरूपदेशाद्या नात्मज्ञानस्य कारणम् ।। ११
गुरुर्हीन्द्रियवृत्तात्मा ब्रह्म सर्वेन्द्रियक्षयात् ।
यद्वस्तु यत्क्षये प्राप्यं तत्तस्मिन्सति नाप्यते ।। १२
अकारणान्यपि प्राप्ता भृशं कारणतां द्विज ।
क्रमा गुरूपदेशाद्या आत्मज्ञानस्य सिद्धये ।। १३
क्रमे गुरूपदेशानां प्रवृत्ते शिष्यबोधतः ।
अनिर्देश्योऽप्यदृश्योऽपि स्वयमात्मा प्रसीदति ।। १४
शास्त्रार्थैर्बुध्यते नात्मा गुरोर्वचनतो न च ।
बुध्यते स्वयमेवैष स्वबोधवशतस्ततः ।। १५
गुरूपदेशशास्त्रार्थैर्विना चात्मा न बुध्यते ।
एतत्संयोगसत्तैव स्वात्मज्ञानप्रकाशिनी ।। १६
गुरुशास्त्रार्थशिष्याणां चिरसंयोगसत्तया ।
अहनीव जनाचार आत्मज्ञानं प्रवर्तते ।। १७
कर्मबुद्धीन्द्रियाद्यन्तसुखदुःखादिसंक्षये ।
शिव आत्मेति कथितस्तत्सदित्यादिनामभिः ।। १८
यत्रेदमखिलं नास्ति तद्रूपेणैव चास्ति वा ।
तदाकाशादच्छतरमनन्तं सदिवास्ति हि ।। १९
अविश्रान्ततया यत्र तनुविद्यैर्मुमुक्षुभिः ।
विचित्रशुद्धमननकलङ्ककलितात्मभिः ।। २०

अदूर एव तिष्ठद्भिर्जीवन्मुक्तस्य दृक्पथे ।
मोक्षोपासकबोधाय शास्त्रार्थरचनाय च ।। २१
ब्रह्मेन्द्ररुद्रप्रमुखैर्लोकपालैः सुपण्डितैः ।
पुराणवेदसिद्धान्तसिद्धये भावितात्मभिः ।। २२
चिद्ब्रह्म शिव आत्मेशपरमात्मेश्वरादिका ।
एतस्मिन्कल्पिता संज्ञा निःसंज्ञे पृथगीश्वरे ।। २३
एवमेतज्जगत्तत्त्वं स्वं तत्त्वं शिवनामकम् ।
सर्वथा सर्वदा सर्वसर्वं यत्सुखमास्व भो ।। २४
शिव आत्मा परं ब्रह्मेत्यादिशब्दैस्तु भिन्नता ।
पुरातनैर्विरचिता तस्य भेदो न वस्तुतः ।। २५
एवं देवार्चनं नित्यं ज्ञः कुर्वन्मुनिनायक ।
यत्रास्मदादयो भृत्यास्तत्प्रयान्ति परं पदम् ।। २६
श्रीवसिष्ठ उवाच ।
अविद्यमानमेवेदं विद्यमानमिव स्थितम् ।
यथा तन्मे समासेन भगवन्वक्तुमर्हसि ।। २७
ईश्वर उवाच ।
योऽसौ ब्रह्मादिशब्दार्थः संविदं विद्धि केवलम् ।
स्वच्छमाकाशमप्यस्य स्थूलं मेरुरणोरिव ।। २८
सा वेद्यमिह गच्छन्ती याति चिन्नामयोग्यताम् ।
अप्यवेद्यवती नूनमुन्मन्यन्तपदस्थिता ।। २९
क्षणाद्भावितवेद्यत्त्वादहन्तामनुगच्छति ।
पुरुषत्वात्पुमान्स्वप्ने वनवारणतामिव ।। ३०
अस्याहन्तादिरूपाया देशतां कालतां गताः ।
संपद्यन्ते ततः शून्यरूपिण्यः सख्य एव ताः ।। ३१
ताभिः संवलिता सैव सत्ता जीवाभिधानिका ।
भवति स्पन्दविज्ञाना पवनस्येव लेखिका ।। ३२

जीवशक्तिस्तथाभूता निश्चयैकविलासिनी ।

बुद्धितामनुयाता सा भवत्यज्ञपदे स्थिता ।। ३३

शब्दशक्त्या क्रियाशक्त्या ज्ञानशक्त्यानुगम्यते ।

प्रत्येकं प्रस्फुरत्यन्तरप्रदर्शितरूपया ।। ३४

मिलित्वैष गणः क्षिप्रं स्मृतिं समनुकूलयन् ।

मनो भवति भूतात्मबीजं संकल्पशाखिनः ।। ३५

आतिवाहिकदेहोक्तिभाजनं तद्विदुर्बुधाः ।

अन्तस्थया ब्रह्मशक्त्या ज्ञरूपं स्वात्मनात्मदृक् ।। ३६

संपद्यमाना एवास्मिंश्चेतसीमा हि शक्तयः ।

पश्चादिह बहिष्ठास्ता उद्यन्त्यनुदिता अपि ।। ३७

वातसत्ता स्पन्दसत्ता स्पर्शसत्ता तथैव च ।

त्वक्सत्ता तेजसां सत्ता तथा सत्ताप्रकाशिनी ।। ३८

रूपसत्ता जलसत्ता स्वादुसत्ता तथैव च ।

तथैव रससत्ता च गन्धसत्ता तथैव च ।। ३९

भूसत्ता हेमसत्ता च पिण्डसत्ता च पीवरी ।

देशसत्ता कालसत्ता सर्वाढ्याकारवर्जिता ।। ४०

सर्वसत्तागणं चैतत्क्रोडीकृत्य स्वरूपवत् ।

स्फुरत्याश्रित्य पत्रादि बीजं बीजादितां गतम् ।। ४१

एतत्पुर्यष्टकं विद्धि देहोऽयं चातिवाहिकः ।

अपारबोधमेतत्तु स्फुरत्यङ्ग विभागवत् ।। ४२

एवमाद्यङ्गसंपन्नं संपन्नं न च किंचन ।

न ज्ञानं न च तद्रूपं न विदाचितचेतनम् ।। ४३

परं परे प्रस्फुरितं केवलं केवलात्म सत् ।

जलपीठस्य जठरे जलद्रवविलासवत् ।। ४४

संवित्संवेदनैकात्म पृथगेतदचेतनम् ।

संपद्यते परिज्ञातं संकल्पनगरोपमम् ।। ४५

संवेदनात्परिज्ञानाच्छिवतामेव गच्छति ।
अज्ञातमेव वा यत्तत्कथं गच्छति वस्तुताम् ।। ४६
अथैतद्विन्दते स्वान्तःसंकल्पादंशता स्वतः ।
तन्मात्रसत्ता तस्याणोरेतां पश्यति देहके ।। ४७
सर्वं स्थूलत्वमापन्नं तदेवाशु प्रपश्यति ।
तस्य तन्मात्ररन्ध्राणि यथादेशं प्रपश्यति ।। ४८
ततः पुरुषरूपैकभावनात्पुरुषाकृतिम् ।
काकतालीयवद्दृष्ट्वा तुष्टं पुष्टं भवत्यलम् ।। ४९
जीवदेतदवस्थाकं स्थितं पश्यति देहकम् ।
असन्तमेव गन्धर्वपुरं स्वप्नरं यथा ।। ५०
श्रीवसिष्ठ उवाच ।
गन्धर्वनगराकारमपि स्वप्ननरोपमम् ।
जगद्दुःखाय दुःखस्य कात्र युक्तिः परिक्षये ।। ५१
ईश्वर उवाच ।
वासनावशतो दुःखं विद्यमाने च सा भवेत् ।
अविद्यमानं च जगन्मृगतृष्णाम्बुभङ्गवत् ।। ५२
अतः किं वास्यते केन कस्य वा वासना कुतः ।
कथं स्वप्ननरेणाङ्ग मृगतृष्णाम्बु पीयते ।। ५३
सद्रष्टरि तु साहन्ते समनोमननादिके ।
अविद्यमाने जगति यत्सत्तत्परिदृश्यते ।। ५४
यत्र नो वासना नैव वासको नैव वास्यता ।
केवलं केवलीभावः संशान्तकलनभ्रमः ।। ५५
यस्य सत्योऽप्यसत्यो वा शून्य एव हि यक्षकः ।
विलीनस्तस्य कैवल्यात्किमन्यदवशिष्यते ।। ५६
शून्य एव हि वेताल इवेत्थं चित्तवासना ।
उदितेयं जगन्नाम्नी तच्छान्तौ शान्तिरक्षता ।। ५७

अहन्तायां जगति च मृगतृष्णाजले च यः ।

सास्थस्तं थिग्घतनरं नोपदेश्यस्त्वसाविति ।। ५८

जीवं विवेकिनमिहोपदिशन्ति तज्ज्ञा

नो बालमुद्भ्रममसन्मयमार्यमुक्तम् ।

अज्ञं प्रशास्ति किल यः कनकावदातां

स स्वप्नदृष्टपुरुषाय सुतां ददाति ।। ५९

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० निर्वाणप्रकरणे पू० जगन्मिथ्यात्वप्रतिपादनं नामैकचत्वारिंशः सर्गः ।। ४१ ।।